न्टपविजययात्रायां बुधकुजशुक्राभिमुख्यमपि निषिद्धम्। "प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतोन्टपः। बलेन शक्रकल्पोऽपि हतसैन्योनिवर्त्तते" इति वशिष्ठः।

एतदभिप्रायेणैव कुमा० वर्णितम्। "दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे" इति। दिगीशाभिमुख्ये गमनं शस्तं प्रातिमुख्येऽशस्तम्। तत्र दिगीशाः "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी। सौम्यस्त्रिदशमन्त्री च पूर्व्वादीनां दिगीश्वराः। दिगीशाहे शुभा यात्रा पृष्ठाहे मरणं ध्रुवम्" ज्यो० त०।

नववध्वागमनेऽपि शुक्राभिमुख्यनिषेधः सप्रतिसवः ज्यो० त० दर्शितो यथा।

दीपिकायां "स्त्रीशुद्ध्यालिघटाजसंगतरवौ काले विशुद्धे भृगुं संत्यज्य प्रतिलोमगं शुभदिने यात्रा प्रवेशोचिते। त्यक्त्वाहस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः कुर्य्यादेकपुरादिषु प्रतिभृगोर्नेच्छन्ति दोषं बुधाः"। पित्रागारे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धोन भवति यदा संमुखोवापि शुक्रः। मेषे कुम्भेऽलिनि च न भवेत् भास्करस्थेत्तथापि स्वामी भद्रेऽहनि नववधूं वेशयेन्मन्दिरं स्वम्। भर्त्तुर्गोचरशोभने दिनपतौ नास्तं गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च कृष्णेतरे। हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा चानीता गुणशालिनी नववधूर्नित्योत्सवा मोदते। एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे। पतिना नीयमानायाः पुरः शुक्रोन दुष्यति"। तथा "काश्यपेषु वशिष्ठेषु भृग्वत्र्याङ्गिरसेषु च। भारद्वाजेषु वात्स्येषु प्रतिशुक्रोन दोषकृत्" शम्भोराभिमुख्यं पूजने निषिद्धं यथा "न प्राचीमग्रतः शम्भोर्नोदीचीं शक्तिसंस्थिताम्। न प्रतीचीं यतःपृष्ठमतोदक्षं समाश्रयेत्" रुद्रया०। "यजमानः शम्भोः प्राचीमवस्थितये न समाश्रयेत्। शम्भोर्जगत्संहारकस्याग्रतः सांमुख्यात् पञ्चवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितम् एकवक्त्रपक्षे सुतरां तथा" ति० त० रघु०।

**आभिरूपक** न० अभिरूपस्य भावः मनो० वुञ्। सौन्दर्य्ये

**आभिरूप्य** न० अभिरूपस्य भावः ष्यञ्। सौन्दर्य्ये "आभिरूप्याच्च बिम्बानां देवः सन्निध्यमृच्छति" हय० रा०।

**आभिषिक्त** त्रि० अभिषिक्तमभिषेकः तेन निर्वृत्तः सङ्का० अञ्। अभिषेकनिर्वृत्ते।

**आभिषेचनिक** त्रि० अभिषेचनं राज्याभिषेकः प्रयोजनमस्य ठञ्। राजाभिषेकसाधने द्रव्यभेदे "आभिषेचनिकं यच्च रामार्थमुपकल्पितम्। भरतस्तदवाप्नोतु" भा० व० २७५ अ०। तत्रत्यद्रव्यादिविधानानि" भा० शा० प० ४० अ० पुराकल्पव्याजेनोक्तानि यथा "ततः प्रकृतयः सर्वाः पुरस्कृत्य पुरोहितम्। ददृशुर्धर्मराजानमादाय बहुमङ्गलम्। पृथिवीञ्च सुवर्णञ्च रत्नानि विविधानि च। आभिषेचनिकं भाण्डं सर्वसम्भारसम्भृतम्। काञ्चनौदुम्बरास्तत्र राजताः पृथिवीमयाः। पूर्णाः कुम्भाः सुमनसोलाजा वर्हींषि गोरसम्। शमीपिप्पलपालाशसमिधो मधुसर्पिषी। स्रुव औदुम्बरः शङ्खस्तथा हेमविभूषितः। दाशार्हेणाभ्यनुज्ञातस्तत्र धौम्य पुरोहितः। प्रागुदक्प्लवने वेदीं लक्षणेनोपलिख्य च। व्याघ्रचर्म्मोत्तरे शुक्ले सर्वतोभद्र आसने। दृढपादप्रतिष्ठाने हुताशनसमत्विषि। उपवेश्य महात्मानं कृष्णाञ्च द्रुपदात्मजाम्। जुहाव पावकं धीमान् विधिमन्त्रपुरस्कृतम्। ततउत्थाय दाशार्हः शङ्खमादाय पूजितम्। अभ्यषिञ्चत्पतिं पृथ्व्याः कुन्तीपुत्रं युधिष्ठिरम्। धृतराष्ट्रश्च राजर्षिः सर्व्वाः प्रकृतयस्तथा। अनुज्ञातोऽथ कृष्णेन भ्रातृभिः सह पाण्डवः। पाञ्चजन्याभिषिक्तश्च राजाऽमृतमुखोऽभवत्। ततोऽनु वादयामासुः पणवानकदुन्दुभीन्। धर्म्मराजोऽपि तत्सर्वं प्रतिजग्राह धर्म्मतः। पूजयामास तांश्चापि विधिवद्भूरिदक्षिणः। ततो निष्कसहस्रेण ब्राह्मणान् स्वस्ति वाचयन्। वेदाध्ययनसम्पन्नान् धृतिशीलसमन्वितान्"। एतानि द्रव्यादीनि राजाभिषेचनिकानि ज्ञेयानि अधिकं राजाभिषेकशब्दे वक्ष्यते स्त्रियां ङीप्। अभिषेचनमधिकृत्य कृतोग्रन्थः ठक्। अभिषेकाधिकारेण कृते २भारतान्तर्गते अवान्तरपर्वभेदे "आभिषेचनिकं पर्व्व धर्म्मराजस्य धीमतः" भा० आ० १ अ०। अभिषेचनं स्नानं प्रयोजनमस्य ठञ्। ३स्नानार्थे विधाने तत्रत्ये ४द्रव्यमन्त्रादौ च स्नानविभागपूर्वकं तत्रत्यद्रव्यविधानमन्त्रा उच्यन्ते। तत्र स्नानं तावत् सप्तविधम्" मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात्। "आपोहिष्ठादिभिर्मान्त्रम् मृदालम्भश्च पार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं रजसा कृतम्। अङ्गिरातपवर्षाभिः स्नानं तद्दिव्यमुच्यते। वारुणञ्चावगाहस्तु मानसं विष्णुचिन्तनम्" योगिया० तत्र विशेषस्तेनैवोक्तः" "शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम्। एतैस्तु पञ्चभिर्मन्त्रैर्मन्त्रस्नानं तदुच्यते" मन्त्राणां समुच्चयोविकल्पोवा शक्त्यपेक्षया। तत्र वारुणं स्नानं मुख्यमसामर्थ्ये अन्यानि